होमपद्धति गुरुस्तोत्र

नं० १२५४

(अघहोमपद्धतिः)

ॐश्रीगण

ॐ श्रीगणेशाय नमः ॥ अथ होमविधिः ॥
मूलेन प्राणायामं अंगन्यासं करन्यासं च कृ-
त्वा यथोक्तकुंडे हस्तमात्रं चतुरस्रं चतुरंगुलो-
च्छ्रितं स्थंडिलं वा संस्कारचतुष्टयं कुर्यात् ॥
तद्यथा ॥ मूलमंत्रेण समीक्ष्य । फडिति कुशैः
चतुर्दिक्षु प्रोक्ष्य । च पुनः संताड्य । हुमिति मंत्रे-
ण मुष्टिबन्धेन जलेनाभिषिंचेत् ॥ स्थंडिलमध्ये
त्रिकोणषट्कोणाष्टदलभूमन्दिरयुतं यंत्रं
विलिख्य ॥ यंत्रमध्ये ॐ ह्रीं आमिति विलिख्य
पीठपूजां कुर्यात् ॥ तद्यथा ॥ मंडूकाय नमः ।
कालाग्निरुद्राय नमः । आधारशक्त्यै नमः ॥
कूर्माय नमः ॥ पृथिव्यै नमः । सुधासिंधवे नमः ॥
श्वेतद्वीपाय नमः ॥ कल्पवृक्षाय नमः ॥ तन्मूले
मणिमंडपाय नमः ॥ तन्मध्ये हेमपीठाय नमः ॥
चतुर्दिक्षु धर्माय नमः ज्ञानाय नमः वैराग्या-
य नमः । ऐश्वर्याय नमः ॥ चतुर्दिक्षु च ॥

१ लो० प० ति०॥

अधर्माय नमः। अज्ञानाय नमः। अवैराग्याय
नमः। अनैश्वर्याय नमः॥ मध्ये अनन्ताय न
मः। तत्वपद्माय नमः। आनन्दकन्दाय नमः।
संविन्नालाय नमः। प्रकृतिमयपत्रेभ्यो न
मः। विकृतिमयकेसरेभ्यो नमः। पंचाशद्
वीजाढ्यकर्णिकायै नमः॥ तत्रैव अर्कमंड
लाय नमः चन्द्रमंडलाय नमः। वह्निमंडलाय
नमः। सं सत्वाय नमः। रं रजसे नमः। तं तमसे
नमः। आत्मने नमः। अंतरात्मने नमः। परमा
त्मने नमः। ज्ञानात्मने नमः॥ मायातत्वाय न०।
कलातत्वाय न० विद्यातत्वाय नमः॥ परतत्वा
य नमः॥ ततः पीठशक्तीः पूजयेत्॥ ॐ
जयायै नमः। ॐ विजयायै नमः। ॐ अजिता०
ॐ अपराजितायै० ॐ नित्यायै० ॐ विलासि
न्यै० ॐ दोग्ध्र्यै० ॐ अघोरायै० मध्ये मं
गलायै नमः। ह्रीं वागीश्वरी वागीश्वर योगयो
गपीठात्मने नमः। इति प्राग्न पीठे॥ वैष्ण
वपीठे तु ह्रीं लक्ष्मीनारायणायै योगपीठा

त्मने नमः। ओं ह्रीं वागीश्वरीभ्यां नमः॥ इति मं
त्रेण पूजयेत्॥ वैष्णवपीठे तु ओं ह्रीं लक्ष्मीना
रायणाभ्यां नमः। इति मंत्रेण पूजयेत्॥ ततः
सूर्यकान्तादरणितः श्रोत्रियागारतोऽपि वा॥ पात्रे
णापिहिते पात्रे वह्निमानीययेत् ततः॥ फडिति मंत्रे
ण वह्निपात्रमादाय हुमिति मंत्रेणोद्घाट्य फडि
ति मंत्रेण क्रव्यादांशं वह्निं नैरृत दिशि त्यजेत्
मूलेन अग्निं संस्थाप्य पुनः पूर्वोक्त संस्कारच
तुष्टयं कुर्यात् तद्यथा मूलेन वीक्ष्य फडिति
मंत्रेण कुशैः संप्रोक्ष्य फडिति कुशैः संताड्य
हुमिति मुष्टिना सिंचेत् परमाग्निना जाठरा
ग्निना च तस्याग्नेरैक्यं संचिंतयेत्॥ रमिति
मंत्रेण वह्नौ चैतन्यं योजयेत्॥ ततः ओंकारे
णाभिमंत्र्य वमिति मंत्रेण धेनुमुद्रयाऽमृती
कृत्य फडिति मंत्रेण संरक्षेत् हुमिति मंत्रेणाव
गुंठ्य ओंकारेण कुंडोपरि त्रिः भ्राम्य॥ ध्या
यागतामनुस्नातां नीलेन्दीवरधारिणीम्॥

देवेन ध्यायमानां तां स्मृत्वा नयोर्मंडले ।। इध्मारे
णोधियावह्निं स्थापयेदात्मसंमुखम् ।। ततो
जानूपृष्ठधरातलः मूलमंत्रं पठन् ॐ वह्नि
चैतन्याय नमः इति मंत्रं च पठन् देवीदेवयो
रा च मनं दद्यात् ॐ चित्पिंगल हन हन दह दह
पच पच सर्वं ज्ञाज्ञापय स्वाहेति मंत्रेण व
ह्निं प्रज्वाल्य ज्वालिनीमुद्रां प्रदर्श्य ॐ ज
लिंव ध्या ।। उत्थाय । अग्निं प्रज्वलितं वन्दे जा
तवेदं हुताशनं नमः । सुवर्णवर्णममलंडासन्नं
विश्वतोमुखम् ।। इति मंत्रेण उपतिष्ठेत् ।
ॐ अस्य श्रीवह्निं प्रातिवर्णो वह्नि मंत्रस्य
भृगुऋषिः गायत्री छन्दः अग्निर्देवता रं बी
जम् ठद्वयं शक्तिः हवने विनियोगः ।। ॐ वै
श्वानर जातवेद इहावह लोहिताक्ष सर्वकर्मा
णि साधय स्वाहेति मूलाधारोद्गतं संविदग्निं
ललाटनेत्रद्वारा निर्गमय्य तं बाह्याग्निपुञ्जं पा
तयेत् ।। ततः स्वदेहन्यासं कुर्यात् मे नचपा ।।

ॐ ह्रीं हरिण्याये नमः लिंगे ॥ ॐ गगनायै नमः गुदे ॥
ॐ रक्तायै नमः शिरसि ॥ ॐ कलायै नमः मुखे ॥
ॐ सुप्रभायै नमः घ्राणे ॥ ॐ बहुरूपायै नेत्रयोः ॥
ॐ अतिरक्तायै नमः सर्वांगेषु ॥ ततो देवन्यासं
कुर्यात् ॥ देवेभ्यो नमः लिंगे ॥ पितृभ्यो नमः गुदे ॥
गंधर्वेभ्यो शिरसि ॥ यक्षेभ्यो नमः मुखे ॥ नागेभ्यो
नमः घ्राणे ॥ पिशाचेभ्यो नमः नेत्रयोः ॥ राक्षसे
भ्यो नमः सर्वांगे ॥ अथ षडंगन्यासः ॥ सहस्रा
र्चिषे नमः हृदि ॥ स्वस्तिपूर्णाय नमः शिरसि ॥
उत्तिष्ठपुरुषाय नमः शिखायै वषट् ॥ धू
म्रव्यापिने कवचाय हुं ॥ सप्तजिह्वाय नेत्रत्रया
य वौषट् ॥ धनुर्धराय अस्त्राय फट् ॥ अथा
ग्निरूपमूर्तिन्यासः ॥ ॐ अग्नये जातवेदसे न
मः मूर्ध्नि ॥ ॐ अग्नये सप्तजिह्वाय नमः वामांसे ॥
ॐ अग्नये हव्यवाहनाय नमः वामपार्श्वे ॥ ॐ
अग्नये अश्वोदर्याय नमः वामकटौ ॥ ॐ अ

ह्र:
3

ग्नये वैश्वानराय नमः लिंगे ॥ ओं अग्न
ये कौमार तेजसे नमः दक्षिणकटौ ॥
ओं अग्नये विश्वमुखाय नमः दक्षपार्श्वे ॥
ओं अग्नये देवमुखाय नमः दक्षिणपा ॥
ततः मण्डूकादि वह्निमंडलपर्यन्तं पीठदे
वताः स्वदेहे न्यसेत् ॥ ततः अग्निपीठपू
जा न्यासः ॥ ओं पीतायै नमः १ ॥ ओं श्वे
तायै नमः २ ओं अरुणायै नमः ३ ओं कृष्णायै
नमः ४ ओं धूम्रायै नमः ५ ओं तीव्रायै नमः ६
ओं स्फुलिंगिन्यै नमः ७ ॥ ओं रुचिरायै नमः ८
ओं ज्वालिन्यै नमः ९ ॥ ओं रं वह्निपीठास
नाय नमः १० ॥ ततः स्वदेहे अग्निं ध्यायेत् ॥
त्रिनेत्रमारक्ततनुं सप्तशुक्लवसं सुवर्णस्र
जमग्निमीडे ॥ वराभयस्वस्तिकपूर्णके
हस्तं पद्मस्थमाकल्पसमूहयुक्तम् ॥
एवं ध्यात्वा मानसोपचारैः पूजां कुर्यात् ॥

ततः जलेन परिषिच्य प्रागग्रानुदगग्रा
न्वा त्रीन् दर्भान्परिस्तरेत्॥ ततः कुंडेस्थ
ण्डिले वाग्निकोणाकाराग्नि समिधः
पालाशसमिधः बिल्वसमिधश्च स्था
पयेत् तत्र पश्चिमे ब्रह्मणे नमः दक्षि
णे विष्णवे नमः॥ उत्तरे रुद्राय नमः॥ ततः
मंडूकादि परतत्त्वांत पीठ देवतः संपूज्य।
पीठपार्श्वः पूजयेत्॥ पीतायै नम इ
त्यादि तत्र स्वहृदयादनलमावाह्य
गंधादिभिः समभ्यर्च्य षट्सु कोणेषु
मध्ये च जिह्वासु देवता यजेत्॥ ईशाना
दिषु वायव्यंतकोणेषु षट् समर्चयेत्॥
हिरण्याद्यास्तिस्रः कान्तं मध्ये तु वक्तु रूपिणी
म्॥ केसरे स्वगपूजास्याद्दले षट्सु मूर्तयः॥
मातरो ऽष्टौ दलांतेषु भैरवास्तु लदग्नतः॥
धरापुरेन्द्र चक्राद्या वज्राद्यायुध संयुताः॥

५ एवमावरणो युक्तं मत्वाग्निपावकं यजेत् ॥
असितांगो रुरुश्चैव क्रोधश्च उन्मत्तसंज्ञकः ॥
कपाली भीषणश्चापि संहारश्चाष्टभैरवाः ॥
ततः स्रुवाग्निकुण्डान्यापात्रीय तत्रैव
स्रुतिनिःक्षिपेत् । प्रणीताप्रोक्षणीपा
त्रेआज्यस्थालीस्रुवंस्रुचम् । आधोमु
खानि चैतानि होमद्रव्यं घ्रतेकुर्यात् ॥
समिधः पंचपालाशीरन्यदप्युपयोगि
यत् ॥ ततः मूलमंत्रेण पवित्रद्वयकरणं ॥
ततः मूलेन अंभांभसा सर्ववस्तु प्रोक्षणम् ॥
ततः प्रणीतादीनि उत्तानानि विधाय प्रणी
तां जलैः पूरयेत् गंगे च यमुने चैवेति मंत्रे
ण तीर्थान्यावाह्य अंकुशमुद्रया पुष्पा
दिकं निक्षिप्य पवित्रे धृत्वा उत्तवनं कुर्यात्
प्रणीतापात्रं उत्तरस्यां निधाय प्रणीतातः
किंचिज्जलमुद्धृत्य प्रोक्षणीपात्रे क्षिपेत् ॥
पवित्रे गृहीत्वा प्रोक्षणीजलेन हवनीयद्रव्यं

मूलं पठन् प्रोक्षयेत् ततः स्वदक्षिणतः
प्रणीतासनमास्तीर्य तेन ॐ कुशमुद्रया ॥
ॐ विति अत्र कर्मणि ह्रूँ कृतावेद्यकत्वे
न त्वं ब्रह्मा भवेत्यावाह्य ॐ नमो ब्रह्मणे
इति गंधादिभिरभ्यर्चयेत् ॥ ततः स्रुक्
स्रुवौ समाधाय अधोमुखौ वह्नौ त्रिधा
प्रताप्य वामहस्ते कृत्वा दक्षिणहस्तेन
कुशेन तयोरग्रमूलमध्यानि मार्जनं कृ
त्वा अर्घ्योदकेन त्रिवारं संप्रोक्ष्य पुनर्व
ह्नौ प्रताप्य दर्भानग्नौ प्रक्षिपेत् ॥ ततः
स्रुवे ह्रां इच्छाशक्त्यै नमः मूले । ह्रीं ज्ञान
शक्त्यै नमः मध्ये । ह्रूं क्रियाशक्त्यै नमः अ
ग्रे ॥ एवं स्रुचि ॥ ततः आत्मदक्षिणे कु
शोपरि निदध्यात् ततः आज्यस्थालीमादा
य अस्त्राय फडिति प्रक्षाल्य अग्नौ त्रिः परिता
प्य वामहस्तेन संस्थाप्य दक्षिणहस्तेन अर्घ्यो
दकेन त्रिः प्रोक्ष्य पुनरग्नौ प्रताप्य आत्मसं

५ हो०

मुखे स्थापयेत्॥ आज्यमानीयाज्यस्थाल्यांनि
क्षिप्य मूलेनाज्यंवीक्ष्य अस्त्रायफडिति आ
ज्यंप्रोक्ष्य अस्त्रायफडिति दर्भैर्घृतं संताड्य
हुमिति अर्घ्यजलेन अभ्युक्षेत्॥ इतिसं॥
स्कारचतुष्टयंकृत्वा ततः कुंडादंगारानुद्धृत्य
५ ली० वायुकोणे संस्थाप्य नम इतिमंत्रेण आज्य
स्थालींस्थापयेत्॥ इदंतापनम्॥ ततःदर्भयुगलं
प्रज्वाल्य आज्ये निक्षिप्यादग्धप्रोतं नम इ
तिमंत्रेण वन्हौक्षिपेत्॥ इदंपवित्रीकरणम्॥
पुनर्ज्वलितेन दर्भयुग्मेन हुमिति मंत्रमुच्च
रन् घृतंनीराज्य अग्नौप्रक्षिपेत्॥ इत्यभिद्योत
नम्॥ ततः प्रज्वलितकुशमुष्टिंगृहीत्वा ऽस्त्रा
यफडिति मंत्रमुच्चरन् दर्शयेत् इत्युद्योतनम्॥
तस्मादंगाराद्वाज्यस्थालीमानीय आत्मसंमुखे
संस्थाप्य तानंगारानग्नौ प्रक्षिप्यांगारस्थानं
मार्जनंकृत्वा जलंस्पृशेत्॥ ततउत्तानयो
र्हस्तयोरंगुष्ठकनिष्ठिकाभ्यां पवित्रं पृथक्
पृथक्धृत्वा अस्त्रायफडिति मंत्रमुच्चरन्
प्राङ्मुखंघृतमुत्पूयात् पवित्रस्यानांतरस्या

पयेत् ॥ पुनस्तेनैव प्रकारेण तथैव घृतेन प
वित्रांतरं गृहीत्वा तेन पवित्रेण नम इतिमुच्च
रन् आत्मनोऽभिमुखं घृतं संप्लाव्य पूर्वस्थापित
पवित्र दर्भमग्नौ प्रक्षिप्य इति उत्पवनोत्पवने
पवने पवनेन चाज्य स्य संस्कुर्यात् ॥ संस्कार
षड् उदीरिताः ॥ ततः प्रादेशमात्रं सगर्भं दर्भ
युगलमाज्यस्थाल्यां घृतमध्ये निक्षिप्य आज्य
दक्षिणभागे शुक्लपक्षम् आज्यवामभागे कृष्णप
क्षं विचिंत्य वामे इडां दक्षे पिंगलां मध्ये सुषुम्नां
ध्यात्वा होमं कुर्यात् ॥ ततः स्रुवेण नम इति मंत्र
मुच्चरन् दक्षिणभागाद् घृतमादाय ॐ अग्नये
स्वाहा इत्यग्नेर्दक्षिणलोचने जुहुयात् ॥ सं
पातमाज्यं तत्रैव दक्षिणभागे निक्षिपेत् ॥ पु
नर्नम इति मंत्रेण वामभागाद् घृतमादाय सो
माय नम इति वामलोचने जुहुयात् ॥ संपा
तमाज्यं तत्रैव वामभागे क्षिपेत् ॥ पुनर्नम इति
मंत्रेण मध्यभागात् घृतमानीय अग्नीषोमा
भ्यां स्वाहा इति वन्हेर्ललाटनेत्रे हुत्वा संपात

(६) हो०

6

माज्यं मध्यभागे क्षिपेत् ॥ गोपारापक्षे लला
टने आकुतिं न कुर्यात् ॥ नरसिंहविषये कुर्या
देव ॥ पुनर्नेम इन्दिरा क्षिणभागादाज्यमादा
ये ४ य अग्नये स्विष्टकृते स्वाहा इत्यग्ने वक्त्रे हुत्वा
संपातमाज्यं तत्रैव क्षिपेत् ॥ इत्यग्निवक्त्रोद्घा
गा^ टनम् ॥ ततः स्वाप्लावमुच्चार्य आकुतिं दत्वा ॥
हाप्लावमुच्चार्याकुतिशेषं घृतं तत्रैव स्थापयेत् ॥
ततो महाव्याहृतिशेषं स्थापयेत् ॥ ओं भूः स्वाहा
ओं भुवः स्वाहा ओं स्वः स्वाहा ओं भूर्भुवः स्वः स्वाहा
ओं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि
साधय स्वाहा इत्यग्निमंत्रेणाकुतित्रयं दत्वा हुत
शेषं जलपूर्णपात्रे स्थापयेत् ॥ ततः अग्नेर्गर्भा
गर्भाधानं पुंसवनं सीमन्तोन्नयनं पुनः ॥ आनंतरं जा
तकर्म स्यान्नामकरणं तथा ॥ उपनिष्क्रमणं
पश्चात् अन्नप्राशनमीरितम् ॥ चूडोपकरणं भू
यो महानाम्ना महाव्रतम् ॥ अथोपनिषदं स्नानं
गोदानोद्वाहनेमृतिः ॥ शुभेषु सुविवाहांता
क्रियास्याक्रूरकर्मसु ॥ मरणान्ता समुद्दिष्टा

वन्हे राग मवेदिभिः ॥ यथा अग्नेर्गर्भाधानं क
ल्पयामि स्वाहा ॥ अग्ने पुंसवनं कल्पयामि स्वा
हा ॥ इत्यष्टाहुतिर्जुहुयात् ॥ अग्ने सीमंतोन्न
यनं कल्पयामि स्वाहा तत्समये अग्ने त्वं अ
मुक नामासि तत्र मंत्राधिष्ठातृदेवता ना
म्ना नाम कुर्यात् ॥ अथवा अग्ने त्वं वरद
नामासि ~~विश्वरूपनामासि~~ विश्वरूपना
मासि वा नाम कुर्यात् ॥ ततः अमुक नामाग्न
ये निष्क्रमणं कल्पयामि स्वाहा इत्यष्टाहु ति
र्जुहुयात् ॥ एवं संस्कारादिकं कुर्यात् ततः
तस्य पितरौ संपूज्य आत्मनि योजयेत् ॥
तस्य पितरौ वागीश्वरी वागीश्वरौ यथा इदं
पाद्यं वागीश्वर्यै नमः ॥ इति पाद्यादिभिः संपू
ज्य वागीश्वर्यै नमः इति पुष्पांजलित्रयं दत्वा
वागीश्वर्यै नमः इति नमस्कुर्यात् ॥ एवं वागी
श्वरं संपूज्य ॥ वागीश्वरीसहित वागीश्वरपू
जितो सिद्धमस्त्वित्युक्त्वा संहारमुद्रया स्थंडि
लात् वह्निना सापुटे आनीय स्वहृदि स्थापयेत्

६ हो०

ततोग्नेर्जिव्हांगमूर्तीनां मंत्रैरेकैकाहुतीर्जुहुयात्
यथा स्त्रं हिरण्यायैनमः॥ इत्येकाहुतिं जुहुयात्॥
एवमग्रेपि भ्रूं गगनायैनमः। स्त्रूं रक्तायैनमः।
श्रूं कृष्णायैनमः॥ ल्स्रूं सुप्रभायैनमः॥ य्रूं बहु
रूपिण्यैनमः॥ यूं अतिरक्तायैनमः॥ सह
स्रार्चिषे हृदयायस्वाहा॥ उत्तिष्ठपुरुषाय शि
खायैवौषट्॥ धूमव्यापिनेकवचायहुम् स्वाहा।
सप्तजिव्हाय नेत्रत्रयाय वौषट् स्वाहा॥ गो
पालपक्षे सप्तजिव्हाय नेत्राभ्यां वौषट्॥=
धनुर्धराय अस्त्राय फट् स्वाहा॥ अग्नये जा
तवेदसे स्वाहा। अग्नये सप्तजिव्हाय स्वाहा।
अग्नेकव्यवाहनाय स्वाहा। अग्नये अश्वोद
रजाय स्वाहा। अग्नये वैश्वानराय स्वाहा।
अग्नये कौमारतेजसे स्वाहा। अग्नये विश्वमु
खाय स्वाहा॥ अग्नये देवमुखाय स्वाहा।॥
ततो वामहस्ते स्रुवं संस्थाप्य दक्षिणहस्तेन स्रु
वमादाय नमः इतिमुच्चरन् स्रुवेन चतुरा
ज्याहुतीः स्रुचीदत्वाऽधोमुखेन स्रु[illegible]वं विधाय
स्रुवेन

अग्निं ब्रूम् वैश्वानर जातवेद इहावह लोहिताक्ष स
र्वकर्माणि साधय स्वाहा ओं वह्नि इत्यग्नि मन्त्रेणाहु
तीः कृत्वा व्यस्तेन च दशाऽऽहुतीर्जुहुयात्
ओं स्वाहा १ ओं श्रीं स्वाहा २ ओं श्रीं ह्रीं स्वाहा ३ श्रीं
ह्रीं क्लीं स्वाहा ४ ओं श्रीं ह्रीं क्लीं ग्लौं स्वाहा ५ ओं श्रीं
ह्रीं क्लीं ग्लौं गं स्वाहा ६ ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपत
ये स्वाहा ७ ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरव
रद स्वाहा ८ ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ९
ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं
मे वशमानय स्वाहा १० इति दशाहुतीर्हुत्वा
अग्नौ इष्टदेवतायन्त्रं ध्यात्वा विन्दुपीठे देवतां
ध्यात्वा वाह्याग्निना सहैक्यं विभाव्य तस्या
मुखे पंचविंशत्याहुतीर्जुहुयात् ॥ यथा मूलमु
च्चरन् इदं स्वाहा ऽमुकदेवतायै ९ तन्मन्त्रे
व पंचविंशत्याहुतीर्जुहुयात् ॥ इदं ध्येयीकर
णम् ॥ ततो वह्निदेवतयोरात्मनाच सहैक्यं
विभाव्य मूलेनैकादशाहुतीर्जुहुयात् इदं
नाडीसन्धानम् ॥ जुहुयादंगमुख्या
वह्निरूपान्तां विचिन्त्य नित्यपूजाक्रमेण सपरि

नामाहुतीनामनुक्रमात्॥ एकैकामाहुतिं सम्य
क्सर्पिषा दीपिकात्मनः॥ इष्टदेवस्याहुतीनामेके
काहुतिं चरेत्॥ ततस्तन्मूलमन्त्रेणाद्यकाधाजुहु
याद्घृतम्॥ ततः कल्पोक्तद्रव्येणाद्यप्तापांजुहु
याज्जपात्॥ होमं समाप्य कुर्वीत पूर्णाहुतिम
नन्यधीः॥ होमावशिष्टेनाज्येन पूरयित्वा स्रु
वं सुधीः॥ पुष्पं फलं निधायाग्रे स्रुवेणाच्छाद्य
तां पुनः॥ उच्छ्रितो वैश्वौषडन्तेन मूलेन जुहुयाद
सौ॥ तद्द्रव्येणाहुतीनां च जुहुयादाहुतिं पृथक्॥
देवं विसृज्य स्वहृदि वह्नेर्जिह्वांगमूर्तिभिः॥ जु
हुयाद्व्याहृतीर्हुत्वा वक्षेण स्रोदितांजलैः॥
संप्रार्थ्यानेन मनुना नत्वा तं विसृजेद्धृदि॥
भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक॥ क
र्मान्तरेऽपि संप्राप्ते सान्निध्यं कुरु सादरम्॥
वह्नेरुपचित्रे निक्षिप्य प्रणीतां बुधु विक्षिपेत्॥
विधिं विसृज्य सकुप्तान् परिधीन्विन्यसेद्वसौ॥
एवं होमं समाप्याथ तर्पयेद्देवताजलैः॥

इति मंत्रमहोदध्यनुसारिणी होमपद्धतिः ॥

आवाहनं द्वयोर्योगेन तर्प्पणादभिषेचनम् ॥
तर्पयामि नमः स्वाहेति द्वितीयांतेषु पूर्वकम् ॥
मूलांतेनु पदं देवमभिषिंचामीत्यभिषेचने ॥ ततो
नानाविधैरन्नैस्तर्पयेद्द्विजसत्तमान् ॥ इष्ट
रूपान् समाराध्य तेभ्यो दद्याच्च दक्षिणाम् ॥
न्यूनं संपूर्णतामेति ब्राह्मणाराधनान्नृणाम्
देवताश्च प्रसीदंति संपद्यंते मनोरथाः ॥

॥ इति ॥

(शुभमस्तु)

ॐ

ॐश्रीगणेशायनमः ब्रह्मस्थान
१ सरोजमध्यविलसच्छीतांशुपीठस्थि
तं स्फुर्यत्सूर्यरुचिम्ववराभयकरं
कर्पूरकुंदोज्वलं श्वेतस्त्रग्वसनानुले
पनयुतंविद्युद्रुचाकांतया तं वंदे शि
वरूपरां निजगुरुं सर्वार्थसिद्धिप्र
दम् ॥१॥ मोहध्वांतमहांधकारनिवृ
तां चहंसविचोन्मीलनं यस्मकेस्वि
राद्यपारात्मनां जनाभ्यंजनैः तं वंदे ॥२॥
मातंगीभुवनेश्वरी च बगुलाधूमाव
तीभैरवी ताछिन्नशिरोधराभगवती
श्यामारमासुंदरी दाहेनप्रभदत्ति
वांछित्फलं यस्यप्रसादं विना तं वं
दे ॥३॥ काशीद्वारवतीप्रयागम

पुरायोध्यामायर्वविका मायापुष्क
रकांचिकल्कलगिरा श्री शैलविंध्याचला
दयः नैतेलारपितुं भवंति पुरषं यस्य
प्रसादं विना तंवंदे ४ रेवासिंधुस
रस्वतीत्रिपथ्यगासूर्यात्मजाकौश
की गंगासागरसंगमाद्रितनया
लौहित्यसोणादयः नालंप्रोक्त
फलप्रदानविषये यस्यप्रसादंवि
ना तंवंदे ५ शास्त्रीजिविमलं
यसः हुकविनापांडित्यमारोग्य
दा वादेवाक्यदृतायुरोनिपुण
ता गांभीर्यमहोभता प्राग्लभं
प्रभुता कुलेचकुरतायस्यप्रसादं
विना तंवंदे ६ लोकेलोहगी

10 २ विकस्मैरहस्यं माता पिता भाग्यजना ग्रा
ंथः कुलपूजितो पतिवरो वृद्धस्तथा
भिक्षुकः नैते यस्य तु तांवुजं कमयाका
रायवरांनिधेः तं वंदे ७ ध्यानं दे
वतपूजनं गुरुतपो दानाग्निहोत्रा
दयः पाठे होमनिषेव पितृमुखा
द्यव्यागतानोवलिं एतत्सर्वफल
भवंति निजं तं यस्य प्रसादं विना तं
वंदे ८ एवीश्राभिमुखकृतांजलि
८ श्लोकाष्टकं जापठेत् पौरस्मयो
विधिं विनापि लभते मंत्रस्य सिद्धिं प
रां नो विघ्नैरभिभूयते प्रतिदिनं प्राप्नो
ति पूजाफलं देहांते परमं पदं प्रवि
शत्येव योगिनां दुर्लभं तं वंदे ९
इति श्री गुरुस्तोत्रम् समाप्तं ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो
रुद्रः प्रचोदयात् ——

